# shrI gaNAdhipati pancharatna stotram

# શ્રીગણાધિપતિ પઞ્ચરત્નસ્તોત્રમ્

## Document Information

Text title : shrii gaNaadhipati pancharatna stotram

File name : gaNAdhipati5.itx

Category : pancharatna, ganesha, stotra, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_ganesha

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : April 17, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# shrI gaNAdhipati pancharatna stotram

# શ્રીગણાધિપતિ પઞ્ચરત્નસ્તોત્રમ્

ૐ સરાગિલોકદુર્લભં વિરાગિલોકપૂજિતં
સુરાસુરૈર્નમસ્કૃતં જરાપમૃત્યુનાશકમ્ ।
ગિરા ગુરું શ્રિયા હરિં જયન્તિ યત્પદાર્ચકાઃ
નમામિ તં ગણાધિપં કૃપાપયઃ પયોનિધિમ્ ॥ ૧॥

ગિરીન્દ્રજામુખામ્બુજ પ્રમોદદાન ભાસ્કરં
કરીન્દ્રવક્ત્રમાનતાઘસઙ્ઘવારણોદ્યતમ્ ।
સરીસૃપેશ બદ્ધકુક્ષિમાશ્રયામિ સન્તતં
શરીરકાન્તિ નિર્જિતાબ્જબન્ધુબાલસન્તતિમ્ ॥ ૨॥

શુકાદિમૌનિવન્દિતં ગકારવાચ્યમક્ષરં
પ્રકામમિષ્ટદાયિનં સકામનમ્રપઙ્ક્તયે ।
ચકાસતં ચતુર્ભુજૈઃ વિકાસિપદ્મપૂજિતં
પ્રકાશિતાત્મતત્વકં નમામ્યહં ગણાધિપમ્ ॥ ૩॥

નરાધિપત્વદાયકં સ્વરાદિલોકનાયકં
જ્વરાદિરોગવારકં નિરાકૃતાસુરવ્રજમ્ ।
કરામ્બુજોલ્લસત્સૃણિં વિકારશૂન્યમાનસૈઃ
હૃદાસદાવિભાવિતં મુદા નમામિ વિઘ્નપમ્ ॥ ૪॥

શ્રમાપનોદનક્ષમં સમાહિતાન્તરાત્મનાં
સુમાદિભિઃ સદાર્ચિતં ક્ષમાનિધિં ગણાધિપમ્ ।
રમાધવાદિપૂજિતં યમાન્તકાત્મસમ્ભવં
શમાદિષડ્ગુણપ્રદં નમામિ તં વિભૂતયે ॥ ૫॥

ગણાધિપસ્ય પઞ્ચકં નૃણામભીષ્ટદાયકં
પ્રણામપૂર્વકં જનાઃ પઠન્તિ યે મુદાયુતાઃ ।
ભવન્તિ તે વિદાં પુરઃ પ્રગીતવૈભવાજવાત્
ચિરાયુષોઽધિકઃ શ્રિયસ્સુસૂનવો ન સંશયઃ ॥ ૐ ॥

॥ ઇતિ દક્ષિણામ્નાય શ્રિઙ્ગેરી શ્રીશારદાપીઠાધિપતિ
શઙ્કરાચાર્ય જગદ્ગુરુવર્યો શ્રી સચ્ચિદાનન્દ
શિવાભિનવ નૃસિંહભારતી મહાસ્વામિભિઃ વિરચિતમ્
શ્રી ગણાધિપતિ પઞ્ચરત્ન સ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

---

*shrI gaNAdhipati pancharatna stotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*